आचार्य - द्वितीय सेमेस्टर
चतुर्थ - पत्रम्

(1) प्रश्न - यशमधुसूदनग्रन्थस्य प्रणेता कः ?
उत्तर - पं मधुसूदन ओझा:

(2) प्र० - यशे कति निषिद्धवृक्षाः ?
उत्तर - दशवृक्षाः

(3) प्र० - कयोश्चिद्द्वयोः निषिद्धवृक्षयोः नामानि लिखत
उत्तर - कोविदारः कदम्बश्च

(4) प्र० - "श्रीखण्डम्" कस्य पर्यायः ?
उत्तर - चन्दनस्य

(5) प्र० - "चन्द्रद्युतिः" इति शब्दः कस्य पर्यायः ?
उत्तर - चन्दनस्य

(6) प्र० - "श्रीफलम्" कस्य पर्याय भूतम् ?
उत्तर - बिल्वस्य

Scanned with CamScanner

(7) प्र० - "त्रिदल:" कस्य पर्याय: ?

उत्तर - बिल्वपत्रस्य

(8) प्र० - बिल्वस्य त्रीणि नामानि लिखत ।

उत्तर - त्रिशिख:, शिवद्रुम:, लक्ष्मीफलम्

(9) प्र० - प्रमुखरूपेण कति यज्ञोपयोगिवृक्षा: ?

उत्तर - षोडश (16)

(10) प्र० - ब्रह्मवृक्ष:, ब्रह्मपादपम्, ब्रह्मोपनेतादि शब्द: कस्य वृक्षस्य वाचक: ?

उत्तर - पलाशवृक्षस्य

(11) प्र० - पलाशवृक्षस्य पञ्च नामानि लिखत ।

उत्तर - करक:, सुपर्णी, वृतद्रु:, कामिदन:, क्षारश्रेष्ठश्च

(12) प्र० - पलाशस्य गुणद्वयं लिखत ।

उत्तर - कषाय: तिक्तश्च

(13) प्र० - "खद्यपत्री" कस्य वृक्षस्य वाचक: ?

उत्तर - खदिरवृक्षस्य

Scanned with CamScanner

(14) प्र० - खदिरवृक्षस्य पञ्चनामानि लिखत ।

उत्तर - रवधपत्री, प्रसरवः, खदिरः, कर्करी, गायत्री च ।

(15) प्र० - पलाशस्य प्रयोगः कस्मिन् रोगे भवति । कयोश्चित् द्वयोः नामानि लिखत ।

उत्तर - कफः पित्तश्च

(16) प्र० - "अश्वत्थः" कस्य वृक्षस्य वाचकः ?

उत्तर - पिप्पलवृक्षस्य

(17) प्र० - "क्रमुकः" कस्य वाचकः ?

उत्तर - पूंगीफलस्य

(18) प्र० - शमीवृक्षस्य पञ्चनामानि लिखत ।

उत्तर - तपनतनया, पापनाशिनी, पापशमनी, दुरितदमनी, कृषभवनी ।

(19) प्र० - चन्दनवृक्षस्य पञ्चनामानि लिखत ।

उत्तर - तिलपर्णम्, तैलपर्णिकः, भद्रश्रीः, श्रीखण्डम्, मलयजश्च ।

Scanned with CamScanner

(20) प्र० - अधरारणि केन काष्ठेन निर्मीयते ।

उत्तर - शमी - अश्वत्थ काष्ठाभ्यां निर्मीयते ।

(21) शमीगर्भः किमुच्यते ?

उत्तर - शमीवृक्षेण संसक्तमूलो योऽश्वत्थवृक्षः

(22) प्र० - उत्तरारणि कया समिधया निर्मीयते ?

उत्तर शमी अश्वत्थ काष्ठाभ्यां निर्मीयते ।

(23) प्र० - ध्रुवपात्रः केन काष्ठेन निर्मीयते ?

उत्तर - वैकङ्कती काष्ठेन ।

(24) प्र० - यज्ञे निषिद्ध - वृक्षाणां प्रश्न नामानि लिखत ।

उत्तर - विभीतकः, कोविदारः, शाल्मली, निम्ब, दधित्थ

(25) प्र० - "विभीतकः" इति शब्देन किं ज्ञायते ?

उत्तर - "बहेडा" इति नाम्ना ज्ञायते ।

(26) प्र० - "कोविदार" इति शब्देन किं ज्ञायते ?

उत्तर - कचनार

Scanned with CamScanner

(27) प्र० - उपलापात्रं केन निर्मीयते ?

उत्तर - पाषाणेन

(28) प्र० - "आज्य" इत्यनेन किं ज्ञायते ?

उत्तर - घृतम्

(29) प्र० - दृषद् इति शब्दस्य कोऽर्थः ?

उत्तर - शिला (पेषणार्थम् आधारभूतः)

(30) प्र० - "कृष्णाजिनम्" इत्यनेन किं ज्ञायते ?

उत्तर - कृष्णसारमृगचर्मखण्डम् ।

(31) प्र० - अन्वाहार्यस्थाली केनोच्यते ?

उत्तर - यस्यां स्थाल्याम् अन्वाहार्यो ओदनः श्रप्यते ।

(32) प्र० - पिष्टपात्री केन उच्यते ?

उत्तर - मर्जनार्थमपेक्षितं मृण्मयं पात्रम् ।

(33) प्र० - कति उपयोजन पात्राणि सन्ति ?

उत्तर - 29

Scanned with CamScanner

(34) प्र० - कूर्चः नाम किम् ?
उत्तर - मलिनद्रव्यमलापकर्षणाद्यायुपयुज्यते इति कूर्चः ।

(35) प्र० - "प्रोक्षण्यः" इत्यनेन किं ज्ञायते ?
उत्तर - व्रीह्यादिप्रोक्षणार्थम् आग्निहोत्रहवण्यां गृहीता आपः प्रोक्षण्यः इति ज्ञायते ।

(36) - प्र० - अर्थसंग्रहस्य प्रणेता कः ?
उत्तर - लौगाक्षिभास्करः ।

(37) - अध्वर्योः व्यापारः कः ?
- यागादि कर्म ।

(38) - प्रकृतिः का ?
- यत्र समग्राङ्गोपदेशः ।

(39) - विकृतिः का ?
- यत्र न समग्राङ्गोपदेशः ।

(५०) - अर्थसंग्रहानुसारं वेदः कः ?

अपौरुषेयं वाक्यं वेदः ।

(५१) - प्रयोगविधेः सहकारिभूतानि कति प्रमाणानि

- पञ्च (5)

(५२) - क्रमो नाम किम् ?

- वितातिविशेषः पौर्वापर्यं वा ।

(५३) - अर्थसंग्रहः केन दर्शनेन सम्बद्धः ?

- पूर्वमीमांसा

(५४) - पूर्वमीमांसायाः प्रकरणग्रन्थः कः ?

- अर्थसंग्रहः ।

(५५) - "अथातो धर्मजिज्ञासा" वाक्येऽस्मिन् "अथ" शब्द कस्य वाचकः ?

- वेदाध्ययनानन्तर्यवचनः ।

(५६) - "अतः" शब्द कस्य वाचकः ?

वेदाध्ययनस्य दृष्टार्थत्वस्य वाचकः ।

Scanned with CamScanner

(47) - मीमांसादर्शनस्य अपरं नाम किम् ?
- द्वादशलक्षणी

(48) - मीमांसासूत्रस्य कर्ता कः ?
- जैमिनिः

(49) - श्रुत्यादि षट् प्रमाणानि कानि ?
श्रुत्यर्थपाठस्थानमुख्यप्रवृत्त्याख्यानि ।

(50) - श्रुतेः लक्षणं किम् ?
- क्रमप्रवचनं श्रुतिः ।

(51) - सा श्रुति कतिविधा ?
- द्विविधा

(52) - अर्थक्रमस्य लक्षणं किम् ?
यत्र प्रयोजनवशेन क्रमनिर्णयः

(53) - अर्थक्रमः कस्मात् बलवान् ?
पाठक्रमात्

Scanned with CamScanner

(54) • साधनक्रोनाम किम् ?

- सोमयागः

(55) - अधिकारविधेः लक्षणं किम् ?

- कर्मजन्यफलस्वाम्यबोधकोविधिः

(56) • लौगाक्षिभास्करानुसारं मन्त्रस्य लक्षणं किम् ?

प्रयोगसमवेतार्थस्मारकाः मन्त्राः ।

(57) - विचारस्वरूपात्मकः मन्त्रः कः ?

अधः स्विदासीदुपरि स्विदासीत् ।

(58) • अपूर्वविधेः लक्षणं किम् ?

अत्यन्तम् अप्राप्तस्य प्रापको विधिः अपूर्वविधि

(59) "नियमविधेः" लक्षणं किम् ?

पक्षे अप्राप्तस्य प्रापको विधिः नियमविधिः

(60) नाना साधनसाध्यक्रियायमेकसाधनप्रप्तावप्राप्तस्यापरसाधनस्य प्रापको विधिः ?

नियमविधिः

Scanned with CamScanner

(61) · व्रीहीन्वहन्तीति कस्य विधेः उदाहरणम् ?

नियमविधेः

(62) · दर्शपौर्णमासयागः प्रकृतिः उत विकृतिः ?

प्रकृतिः

(63) . परिसंख्याविधेः लक्षणं किम् ?

उभयोश्च युगपत्प्राप्तावितरव्यावृत्तिपरो विधिः परिसंख्या

(64) "पञ्च पञ्चनखा भक्ष्याः" इति कस्य उदाहरणम् ?

परिसंख्याविधेः

(65) · परिसंख्याविधिः कति दोषग्रस्तः ?

त्रयः

(66) परिसंख्याविधौ के के दोषाः भवन्ति ?

श्रुतहानिः, अश्रुतपरिकल्पना प्राप्तबाधश्च

(67) परिसंख्याविधिः कतिविधः ?

द्विविधः

Scanned with CamScanner

(68) निषेधस्य लक्षणं किम् ?

प्रवृत्तस्य निवर्तकं वाक्यं निषेधः।

(69) "न कलञ्जं भक्षयेत्" इति कस्य विधेः उदाहरणम् ?

निषेध मीमांसायाः

(70) निषेधस्य कतिविधं बाधकम् ?

द्विविधम्

(71) अर्थवादस्य लक्षणं किम् ?

प्रशस्त्यानिन्दान्यतरपरं वाक्यमर्थवादः

(72) अर्थवादः कतिविधः ?

त्रिविधः (गुणवादः, अनुवादः, भूतार्थवादः)

डॉ धर्मेन्द्रकुमारपाठकः
जयपुरपरिसरः

Scanned with CamScanner